Shodhshauryam, International Scientific Refereed Research Journal
© 2019 SHISRRJ | Volume 2 | Issue 3 | ISSN : 2581- 6306

# काव्यस्योपयोगिता

डाँ राजकिशोर मिश्र:
सहायक प्राध्यापक: / वेद विभाग:
बाबा साहेब राम संस्कृत महाविद्यालय:,
पचाढी, दरभंगा, बिहार, भारत।



**सारांश**: – संस्कृतविद्या सर्वास्वपि विद्यासु प्राचीनतमा नास्त्यत्र कश्चन विवाद:। विश्वस्मिन् लब्धप्रचुरप्रचारा अन्या विद्या: संस्कृतापेक्षया पश्चादुद्भवा इति भाषातत्वविदां सर्वसम्मतम् मतम्। विद्यान्तरविलक्षणै: प्रकृतिप्रत्ययादिसंस्कारविशेषै: संस्कृतत्वादियं विद्या संस्कृतविद्या इति सार्थकत्वं प्राप्ता । प्रकृतिप्रत्ययसंस्कारयुक्ता इयं विद्या साधुशब्दवतीति । साधुशब्प्रयोगेन धर्मो भवति, असाधुशब्दप्रयोगेन त्वधर्म:। यथोक्तं महाभाष्ये पतञ्जलिना– "एक:शब्द:सम्यकग्ज्ञात: सुप्रयुक्त: स्वर्गे लोके च कामधुग्भवति, मातापितरौ च स्वर्गे लोके महीयते ।।1।।" एतेन वर्तमानसन्दर्भेऽपिसंस्कृतविद्याया: कियति उपयोगितेति सुष्पष्टम् । तत्राऽपि काव्यस्योपयोगिता वर्तमानसन्दर्भे सर्वेभ्योऽपि अधिका। यतो हि रजोगुणाधिका मनुष्ययोनि:, अतो मानवा राजसं साहित्यं काव्यं प्रति दत्तचित्ता दृश्यते । प्राय: सर्वेऽपि विद्वज्जना: काव्यसेवनेनैव कालं यापयन्ति ।

**मुख्यशब्द**: **–,** कारणम्**,** संस्कृत**,** उपयोगिता नाट्य ।

संस्कृतविद्या सर्वास्वपि विद्यासु प्राचीनतमा नास्त्यत्र कश्चन विवाद:। विश्वस्मिन् लब्धप्रचुरप्रचारा अन्या विद्या: संस्कृतापेक्षया पश्चादुद्भवा इति भाषातत्वविदां सर्वसम्मतम् मतम्।

विद्यान्तरविलक्षणै: प्रकृतिप्रत्ययादिसंस्कारविशेषै: संस्कृतत्वादियं विद्या संस्कृतविद्या इति सार्थकत्वं प्राप्ता । प्रकृतिप्रत्ययसंस्कारयुक्ता इयं विद्या साधुशब्दवतीति । साधुशब्प्रयोगेन धर्मो भवति, असाधुशब्दप्रयोगेन त्वधर्म:। यथोक्तं महाभाष्ये पतञ्जलिना–

"एक:शब्द:सम्यकग्ज्ञात: सुप्रयुक्त: स्वर्गे लोके च कामधुग्भवति, मातापितरौ च स्वर्गे लोके महीयते ।।1।।"

एतेन वर्तमानसन्दर्भेऽपिसंस्कृतविद्याया: कियति उपयोगितेति सुष्पष्टम् । तत्राऽपि काव्यस्योपयोगिता वर्तमानसन्दर्भे सर्वेभ्योऽपि अधिका। यतो हि रजोगुणाधिका मनुष्ययोनि:, अतो मानवा राजसं साहित्यं काव्यं प्रति दत्तचित्ता दृश्यते । प्राय: सर्वेऽपि विद्वज्जना: काव्यसेवनेनैव कालं यापयन्ति । अत एवोक्तम्–

"काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन च मूर्वाणां निद्रया कलहेन वा ।।2 ।।"

काव्यं राजसं साहित्यमिति भगवता वेदव्यासेन श्रीमद्देवीभागवते प्रोक्तम्।तद्यथा–

सात्विकं वेदशास्त्राणि साहित्यञ्चैव राजसम् ।

तामसं युद्धवार्ता च परदोषप्रकाशनम् ।।3।  इति ।

अनादिकविकृतमाध्यात्मिकसृष्टिपरम्परासञ्चालयितुं नलिनोद्भववाल्मीकिकालिदासप्रभृतय: कविशिरोमणय: शारदाकृपाकटाक्षभाज: परमाह्लादैकमयं काव्यं संसृजु:।यत् काव्यं संसारेSस्मिन् प्राणिषु श्रेष्ठानां सदसद्-विवेकशालिनां कर्त्तव्याकर्त्तव्यज्ञानजिज्ञासूनां, धमार्थकाममोक्षरूपचतुर्वर्गफलप्राप्तिकामानां मानवानां मानसिकबुभुक्षाशान्त्यर्थम्, आध्यात्मिकपिपासा तृप्त्यर्थञ्चात्र समजायत। अतो विलक्षणस्यास्य  काव्यस्य परमोपादेयत्वं परमावश्यकत्वञ्च।आधिभौतिकाधिदैविकाध्यात्मिकदु:खत्रयदाहेनानवरतं दह्यमाना मानवा न मनागपि कदाचित् शान्तिं लभन्ते "अशान्तस्य कुत: सुरवम्" इति भगवत्कथनानुसारेण दु:खाम्भोधौ निमग्नान् मनुजान् सुखयितुं कुवेर-विभवादपि भव्यतरं सारस्वतवैभवं च तेभ्य: प्रदातुं काव्यरससुधामाधुरीं पाययितुं "सत्यं शिवंसुन्दरं चे"ति दिव्यपथं प्रदर्शयितुं कविप्रजापतय: अलौकिकं काव्यं निर्ममु:।तद्यथा-

"सपर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्।कविर्मनीषी परिभू: स्वयम्भूर्याथातथ्यतोSर्थान् व्यदधाच्छाश्वतीभ्य: समाभ्य:।।"

कविशब्द: व्याकरणशास्त्रदृष्ट्या कु, वर्णे, कुङ् शब्दे वा धातो: ईकारप्रत्ययकृते सति निष्पद्यते।तच्च लोकोत्तरवर्णनानिपुणकविकर्म काव्यं पक्षिणां कलकूजितमिव पूजितं कस्य सहृदयहृदयस्य कर्णेषु मधुधारां न वमति । तथोक्तमपि --

"अविदितगुणाSपि सत्कविभणिति: कर्णेषु वमति मधुधाराम्
अनधिगतपरिमलाsपि हि हरति दृशं मालतीमाला ।।"

भारतीयशास्त्रकारा: काव्यकाराश्च प्रत्येकं ग्रन्थस्यारम्भे विषयसम्बन्धप्रयोजनाधिकारिरूपात्मकम् अनुबन्धचतुष्टयं प्रतिपादयन्त्येव।  नाट्यशास्त्रे महामुनिभरत: नाट्यात्मककाव्यस्य ऐहलौकिकानि पारलौकिकानि च प्रयोजनानि प्रतिपादयामास।तद्यथा

"दु:खार्त्तानां श्रमार्त्तानां शोकार्त्तानां तपस्विनाम्।
विश्रामजननं लोके नाट्यमेतद् भविष्यति।।
धर्मं यशस्यमायुष्यं हितं बुद्धिविवर्धनम्।
लोकोपदेशजननं नाट्यमेतद् भविष्यति ।।
वेदविद्येतिहासानामारव्यानपरिकल्पनम्।
विनोदजननं काले नाट्यमेतद् भविष्यति।।5।"

साधुकाव्यनिवन्धनेन निषेवनेन वा जना धमार्थकाममोक्षेषु कलासु च वैचक्षण्यं लोके कीर्तिं सद्य: प्रीतिं च प्राप्नुवन्ति इति भामहाचार्येणाSपि काव्यालङ्कारे प्रोक्तम्।आचार्यदण्डिनाडपि काव्यं चतुर्वर्गफलायत्तमिति प्रतिपादयता काव्यस्य चतुर्वर्गफलरूपं प्रयोजनं भणितम्।

आचार्यकुन्तकस्तु

“धर्मादिसाधनोपाय:सुकुमारक्रमोदित:।

काव्यबन्धोऽभिजातानां हृदयाह्लादकारक:।।

व्यवहारपरिस्पन्दसौन्दर्यव्यवहारिभि:।

सत्काव्याधिगमादेव नूतनोचित्यमाप्यते ।।

चतुवर्गफलास्वादमप्यतिक्रम्य तद्विदाम्।

काव्यामृतरसेनान्तश्चमत्कारो वितन्यते।।6”

इत्येवं त्रिविधं काव्यप्रयोजनं निरूपितवान्।काव्यं सुकुमारमतीनामुच्चकुलसमुत्पन्नानां राजकुमाराणां तथा विधानामन्येषां वा कृते मृदुमार्गेण प्रतिपादितं हृदयाह्लादकारकं धर्मादिचतुर्वर्गफलसाधनं भवति। व्यवहारस्यापि समुचितज्ञानं सत्काव्यादेव भवति ।न केवलमिदमेव,चतुर्वर्गफलमप्यतिक्रम्य काव्यविदां काव्यामृतरसेन एक: अपूर्वोऽन्तश्चमत्कारो जायते। धनञ्जयेन आनन्दप्राप्तिरेव काव्यस्य परमप्रयोजनमिति मन्यमानेन चतुर्वर्गादिसाधनत्वं तु इतिहासादेवेति स्वीकुर्वाणेन एवमुक्तम्

“आनन्दनिष्यन्दिषु रुपकेषु व्युत्पत्तिमात्रं फलमल्पबुद्धि:।

योऽपीतिहासादिवदाह साधुस्तस्मै नम: स्वादुपराङ्मुखाय।।7।।”

वामनाचार्य इव कीर्तिं प्रीतिं च काव्यप्रयोजनं मन्यमानो भोजजराज:

“निर्दोषं गुणवत् काव्यमलङ्कारैरलङ्कृतम्।

रसान्वितं कविर्कुर्वन् कीर्तिं प्रीतिञ्च विन्दति।।8।।” इत्यकथयत्।

स्वजन्मालङ्कृतकाश्मीरप्रदेशै: वाग्देवतावतारै:काव्यप्रकाशकारै:मम्मटभट्टै: स्वकीयस्य सर्वालङ्कारग्रन्थशिरोमणे: काव्यप्रकाशस्य प्रथमोल्लासे शब्दार्थयुगलरुपकाव्यस्य प्रयोजनं निरूपयद्भि: एवमुक्तम्–

“काव्यं यशसेऽर्थकृते व्यवहाराविदे शिवेतरक्षतये ।

सद्य: परनिर्वृत्तये कान्तासम्मिततयोपदेशयुजे।।9।।”

एषु प्रोक्तेषु प्रयोजनेषु आदित:यशोऽर्थानर्थनिवृत्यादीनि त्रीणि काव्यनिर्माणस्य प्रयोजनानि, तथा च द्वे व्यवहारज्ञानोपदेशे च काव्याध्ययनस्य,अवशिष्टानि परमसुखप्रयोजनानि उभयोरपि कृते भवन्ति ।यतो हि अन्यै: पाठकै:समं काव्यनिर्माताऽपि स्वकीयस्य काव्यस्य पाठको भवति।अत: काव्याध्ययनजन्यं सुखं स प्राप्नोत्येव।एवं काव्याद् यश: प्राप्यते यथाकालिदासप्रभृतय:श्रीहर्षधावकादीनामिव धनम्।राज्ञि सचिवगुरूमुन्यादौ च गत:प्राप्तो य: समुचिताचार: पृथिवीपालनादिव्यवहारस्तद्परिज्ञानम्।आदित्यादे:मयूरादीनामिवानर्थनिवारणम्।एवं काव्याध्ययनात् निर्माणाद् वा ब्रह्मानन्दसहोदरस्य रसस्यानुभूति:जायते तद् मोक्षकालिकब्रह्मानन्दसदृशी।

काव्यादेव सम्यगुपदेशं प्राप्यते।अयं भाव:शब्दस्त्रिविध: प्रभुसम्मित:,सुहृद्सम्मित:,कान्तासम्मितश्चोति।तत्र प्रथमो वेदस्मृतिरुप:,यथा– राजा इष्टसाधनानिष्टसाधने निष्फले च भृत्यादिकं नियोजयति तथैव वेदादिरपि नियोजयति।अतो वेदादिशास्त्रस्य प्रभुसम्मितत्वम् ।सुहृद्–सम्मिता मित्रतुल्या अर्थतात्पर्यवन्तो ये पुराणादय: इतिहासारव्यानादयश्च प्राचीनवृत्तवर्णनानि तेभ्यो विलक्षणम्।अर्थात् यथा सुहृद् एवं कृते एवं भवति इति वस्तुतत्वमात्रं बोधयति तथैव पुराणेतिहासादिरपि इति सुहृद्सम्मितत्वम्पुराणादेरिति।कान्तासम्मितत्वञ्च यथा कान्ता गुर्वाद्यधीनमपि कान्तं निजचातुर्येण कटाक्षभुजविक्षेपादिना सरसतामापाद्य स्वाभिमुखीकृत्य स्वस्मिन् प्रवर्तयति एवं काव्यमपि ललितपदसमुहोपदर्शितश्रृङ्गारादिरसेन नीतिशास्त्रपराङ्मुखान् सुकुमारमतीन् राजकुमारादीन् मधुरपानादिना औषधपराङ्मुखान् बालानिव सदुपदेशरूपस्वार्थे प्रवर्तयति।यथा रामादिवद्वर्तितव्यं न रावणादिवदिति।अत एवोक्तम्–

"स्वादुकाव्यरसोन्मिश्रं वाक्यार्थमुपभुञ्जते।

प्रथमालीढमधव:पिबन्ति कटुभेषजम्।।10।।"

अल्पमतीनामपि अनायासेन चतुर्वर्गफलप्राप्ति:काव्यादेवेति मन्यमानेन विश्वनाथेन प्रोक्तम् ––

"चतुवर्गफलप्राप्ति: सुखादल्पधियामपि।

काव्यादेव यतस्तेन तत्स्वरूपं निरुप्यते ।।11।।"

केशवमिश्रेण अलङ्कारशेखरे –

"लाभ: पूजाख्याति:धर्म: कामश्च मोक्षश्च।

इष्टानिष्टप्राप्तित्यागौ ज्ञानं फलानि काव्यस्य।।12।।"

इत्येव कथयताSपि काव्यश्रवणान्तरं तात्कालिकं परमं प्रयोजनं तु परमाह्लाद एवेति व्यवस्थापयाञ्चक्रे।

काव्यस्य युक्तिसिद्धमुपादेयत्वम् अग्निपुराणेSप्युक्तम् –

"नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा।

कवित्वं दुर्लभं तत्र शक्तिस्तत्रसुदुर्लभा।।13।।"

तथा च त्रिवर्गसाधनं नाट्यमिति विष्णुपुराणेSपि उक्तम् –

काव्यालापाशच ये केचिद् गीतकान्यखिलानि च ।

"शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मन:।।14।।"

सर्वविद्याधरेण पण्डितराजजगन्नाथेनाSपि स्वकीये रसगङ्गाधरनाम्नि ग्रन्थे उक्तम्–

"कीर्तिपरमाह्लादगुरूराजदेवताप्रासादाद्यनेकप्रयोजनकस्य काव्यस्य ।।15 ।।"

इमानि सर्वाणि प्रयोजनानि काव्यनिर्माणस्यैव भवितुमर्हन्ति न तु काव्याध्ययनस्य, वस्तुत: एषां प्रयोजनानां कारणं काव्यनिर्माणं तथा काव्याध्ययनं प्रति प्रवर्तनमेव। परमार्थत: काव्यस्यप्रयोजनं रसास्वादमूलकमानन्दातिशयमेव। यद्यपि जना: यशसे जीविकायै काव्यं कुर्वन्ति पठन्ति च तथापि इमानि सर्वाणि काव्यस्य अनन्यसाधारणप्रयोजनानि न सन्ति। यतोहि यशोपजीविकाद्यर्थे चानेके पन्था: सन्ति । अत: काव्यस्य मूलभूतं प्रयोजनं रसास्वादनमे

तथा च साहित्यं समाजस्य दर्पण: इति जनश्रुत्यनुसारेण वर्तमानसन्दर्भे किम्वा सदा सर्वदैव काव्यस्य उपयोगिता अक्षुण्णा तिष्ठति , यतो हि तत्तत्समये निबद्धकाव्ये तात्कालिकसामाजिकव्यवस्थाया: चित्रणं भवति । अत: साहित्यनिर्माणं वा काव्यनिर्माणमवरूद्धं स्यात् तर्हि भूतपूर्वसामाजिकव्यवस्थाया:ज्ञानं कथं भवेत् । अत एव अधुना विश्वस्मिन् सर्वेभ्य: शास्त्रेभ्य: सर्वाभ्यो विद्याभ्यश्च काव्यस्य प्रचार: प्रसारश्च अधिको दरीदृश्यते।

विदितवेदितव्यैर्तत्रभवद्भि: विद्वद्भि: इदमपि ध्येयमस्ति यत् काव्यकर्तारोSध्येतारश्चैव केवलं सहृदया उच्यन्ते नान्या: तत्र किं कारणम् ।यथा काव्ये नाट्ये च स्थितानां दुष्यन्तादीनां अन्येषां वा रत्यादिकं साधारणीकृत्य श्रोतारो द्रष्टारश्च स्वकीयं मत्वा श्रृङ्गारादिकं रसमास्वादयन्ति, तथैव च संसारस्थितै दु:खशोकाद्यभिभूतै: सुखहर्षादियुक्तैश्च जनै: सह मिलित्वा सुखं दु:खञ्चानुभवन्ति अत: सहृदयास्ते कथ्यन्ते इति मे मति:।

इत्थं पर्यालोचनेन समेषां विदुषां किम्वा मूर्र्वाणामपि जनानां समक्षे वर्तमानसन्दर्भेsपि काव्यस्योपगिता का इति स्फुटमेव भवति । इत्यलं विस्तरेण।

सन्दर्भ ग्रन्था: -


1 महाभाष्य

2 हितोपदेश:

3 श्री0 म0 दे0 महा0 1/6/1176

4 शुक्लयजुर्वेद माध्यन्दिनशाखा अ0- 40/8

5 नाट्यशास्त्रम् 1/111,112,116

6 वक्तोक्तिजीवितम् 1/4,6

7 दशरूपकम्

8 सरस्वति कण्ठाभरणम्, प्रथमपरिच्छेद:

9 काव्यप्रकाश: 1/2

10 भामहालङ्कार-5/3

11 साहित्यदर्पण:-1/2

12 अलङ्कारशेखर:-

13 अग्निपुराणम्

14 विष्णुपुराणम्

15 रसगंगाधर:, प्रथमाननम्